## मन्थौदनसक्तुबिन्दुवज्रभारहारवीवधगाहेषु च। (६०/९९८)

मन्थ ओदन सक्तु बिन्दु वज्र भार हार वीवध गाह इत्येतेषु उत्तरपदेषु [1]उदकस्य उद इत्ययमादेशो भवति अन्यतरस्याम्। [2]उदकेन मन्थः उदमन्थः, उदकमन्थः। ओदन–उदकेन ओदनः उदौदनः, उदकौदनः। सक्तु– [3]उदकेन सक्तुः उदसक्तुः, उदकसक्तुः। बिन्दु – [4]उदकस्य बिन्दुः उदबिन्दुः, उदकबिन्दुः। वज्र – उदकस्य वज्रः उदवज्रः, उदकवज्रः। भार – उदकं बिभर्ति इति उदभारः, उदकभारः। हार – उदकं हरति इति उदहारः, उदकहारः। वीवध – उदकस्य वीवधः उदवीवधः, उदकवीवधः। गाह – उदकं गाहते इति उदगाहः, उदकगाहः ॥

## इको ह्रस्वोऽङ्यो गालवस्य। (६१/९९९)

इगन्तस्य अङ्यन्तस्य उत्तरपदे ह्रस्वः भवति गालवस्य आचार्यस्य मतेन अन्यतरस्याम्। ग्रामणिपुत्रः ग्रामणीपुत्रः। ब्रह्मबन्धुपुत्रः, ब्रह्मबन्धूपुत्रः। इकः इति किम्? खट्वापादः। मालापादः। अङ्यः इति किम्? गार्गीपुत्रः। वात्सीपुत्रः। गालवग्रहणं पूजार्थम्। अन्यतरस्याम् इति हि वर्तते। व्यवस्थितविभाषा चेयम्। तेनेह न भवति, कारीषगन्धीपुत्रः इति। इयङुवङ्भाविनामव्ययानां च न भवति। श्रीकुलम्। भ्रूकुलम्। काण्डीभूतम्। वृषलीभूतम्। भ्रूकुंसादीनां तु भवत्येव। भ्रुकुंसः। भ्रुकुटिः। अपर आह।

[७४३] भ्रूकुंसादीनामकारो भवतीति वक्तव्यम्। (म. भा. ३. १६४)

भ्रकुंसः। भ्रकुटिः॥

## एक तद्धिते च। (६२/१०००)

[5]एकशब्दस्य तद्धिते उत्तरपदे [6]ह्रस्वो भवति। एकस्या आगतम् एकरूप्यम्। एकमयम्। एकस्या भावः एकत्वम्। एकता। उत्तरपदे–एकस्याः क्षीरम् एकक्षीरम्। एकदुग्धम्। लिङ्गविशिष्टस्य ग्रहणमे[7]कशब्दह्रस्वत्वं प्रयोजयति। [8]अचा हि गृह्यमाणमत्र विशेष्यते, न पुनरच् गृह्यमाणेन इति॥

## ङ्यापोः सञ्ज्ञाछन्दसोर्बहुलम्। (६३/१००१)

ङ्यन्तस्याबन्तस्य च सञ्ज्ञाछन्दसोः [9]बहुलं ह्रस्वो भवति। ङ्यन्तस्य सञ्ज्ञायाम् – रेवतिपुत्रः। रोहिणिपुत्रः। [10]भरणिपुत्रः। न च भवति। नान्दीकरः। नान्दीघोषः। [11]नान्दीविशालः। ङ्यन्तस्य छन्दसि – '[12]कुमारिदा प्रफर्विदा' (काठ. ३९.९)। न च भवति। फाल्गुनीपौर्णमासी। जगतीछन्दः। आबन्तस्य सञ्ज्ञायाम् – शिलवहम्। शिलप्रस्थम्। न च भवति। लोमकागृहम्। [13]लोमकाषण्डम्। आबन्तस्य छन्दसि– अजक्षीरेण जुहोति। '[14]ऊर्णम्रदाः पृथिवी दक्षिणावत' (अ. १८. ३. ४९)। न च भवति। 'ऊर्णासूत्रेण कवयो वयन्ति' (वा. सं. १९. ८०)॥

---

1. उदकशब्दस्य फ. 2. उदकेन मन्थः नास्ति फ. 3. उदकेन सक्तुः नास्ति फ. 4. उदकस्य बिन्दुः नास्ति फ. 5. ह्रस्व इति वर्तते इत्यधिकम् फ. ह. 6. च इत्यधिकम् ब. ड. ह. 7. एकशब्दः क, एकशब्दस्य ह. 8. अचापि ह. 9. च इत्यधिकम् फ. 10–11. उदाहरणमिदं नास्ति फ. 12. कुमारिदारा ब. क. 13. लोमकाखण्डः ह. 14. ऊर्णम्रदा क, ऊर्णम्रदा ड.